कुर्यादित्युपक्रमे "देवताभ्यर्चनञ्चैव" मनुः। भावे अ। अभ्यर्चाप्यत्र स्त्री।

**अभ्यर्च्य** त्रि० अभि+अर्च–कर्म्मणि ण्यत्। १ अभितः पूजनीये "देवाग्नयः सदाभ्यर्च्यागृहस्थैस्तु विशेषतः" पु०। ल्यप्। २आभिमुख्येन पूजयित्वेत्यर्थे अव्य० "देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्" मनुः।

**अभ्यर्ण** त्रि० अभि+अर्द्द–कर्मणि क्त आविदूर्य्ये इडभावे नि० नत्वम्। समीपे। "कालोऽभ्यर्णजलागमः कुशलिनीवत्सस्य वार्त्तापि न" सा०द०। "अभ्यर्णमागस्कृतमस्पृशद्भिः" रघुः। "क्षणार्णवाभ्यर्णचरैकहंसः" "प्रतप्तमभ्यर्णतया विवस्वता" इति च माघः।

**अभ्यर्थना** स्त्री अभि+अर्थ–भावे युच्। आभिमुख्येन प्रार्थने "अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे" कुमा०। भावे ल्युट्। तत्रैव न०। [अभिमुखं याचनीये।

**अभ्यर्थनीय** त्रि० अभि+अर्थ–गौणे कर्मणि अनीयर्।

**अभ्यर्थित** त्रि० अभि+अर्थ–गौणे कर्मणि क्त। १प्रार्थिते "अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ" रघुः। गौणकर्म्माविवक्षायां मुख्ये क्त। २प्रार्थनाकर्म्मणि।

**अभ्यर्थ्य** त्रि० अभि+अर्थ–ण्यत्। प्रार्थनीये। "कार्य्येषु चैककार्य्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा" रघुः। ल्यप्। अभिमुखं याचयित्वेत्यर्थे अव्य०।

**अभ्यर्द्दित** त्रि० अभि+अर्द्द क्त। भृशपीडिते।

**अभ्यर्हणा** स्त्री अभि+अर्ह–भावे युच्। १ पूजायाम् २अभिमुखमर्चायाञ्च। भावे ल्युट्। तत्रैव न०।

**अभ्यर्हणीय** त्रि० अभि+अर्ह–अनीयर्। पूजनीये। "शार्ङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" मनुः।

**अभ्यर्हित** त्रि० अभि+अर्ह–कर्म्मणि क्त। १पूज्ये २उचिते च।

**अभ्यवकर्षण** न० अभि+अव+कृष–भावे ल्युट्। शल्याद्युद्धारे।

**अभ्यवस्कन्द** पु० अभि+अव+स्कन्द–घञ्। १ शत्रोराक्रमे, २ निर्बलीकरणाय शत्रुभिः क्रियमाणे प्रहारे ३अभ्यवसादने ४ प्रहारमात्रे, ५ आसादने, ६ प्रपाते च। ल्युटि अभ्यवस्कन्दनमप्यत्रार्थे न०।

**अभ्यवहरण** न० अभि+अव–हृ–ल्युट्। भोजने।

**अभ्यवहार** पु० अभि+अव+हृ–घञ्। भोजने। "अल्पान्नाभ्यवहारेण" मनुः।

**अभ्यवहार्य्य** त्रि० अभि+अव+हृ–ल्युट्। भोक्तुं योग्ये। "सर्व्वोदरिकस्याभ्यवहार्यमेव" विक्र०। 'खरं विशदमभ्यवहार्य्यम्' पा०भ०

**अभ्यवहृत** त्रि० अभि+अव+हृ–क्त। भक्षिते।

**अभ्यवायन** न० अभि+अव+इण–ल्युट्। आभिमुख्येनापयाने "यत्र शुष्कस्य चार्द्रस्य च सन्धिःस्यात्तदुपगूहेत यद्यु अभ्यवायनाय" शत०ब्रा०।

**अभ्यसन** न० अभि+अस–ल्युट्। १अभ्यासे २पौनःपुन्ये नैकक्रियाकरणे ३ पुनःपुनरावर्त्तने "विद्यामभ्यसनेनेव प्रसादयितुमर्हसि" रघुः। "स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते" गीता "अनभ्यसनशीलस्य विद्येव तनुतां गता" रामा० "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः" दक्षः।

**अभ्यसनीय** त्रि० अभि+अस–आवश्यकार्थे अनीयर्। अवश्याभ्यासयोग्ये वेदादौ।

**अभ्यसूयक** त्रि० अभि+असू–उपतापे कण्ड्वा० यक् ण्वुल्। अत्यन्तासूयाकर्त्तरि सन्मार्गवर्त्तिनां गुणेषु दोषारोपके। "मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" गीता।

**अभ्यसूया** स्त्री अभि+असू–उपतापे कण्ड्वादि० यक् प्रत्ययान्तत्वात् अ, स्त्रीत्वात् टाप्। गुणेषु दोषारोपणे। "केनाभ्यसूया पदकाङ्क्षिणा ते" कुमा० "रूपेषु वेशेषु च साभ्यसूयाः" "शङ्काभ्यसूयाविनिवृत्तये यः" "नूनं तेषामभ्यसूयापरोऽभूत्" इति च रघुः।

**अभ्यस्त** त्रि० अभि+अस–क्त। पौनःपुन्ये नैकजातीयाक्रिया कर्मणि पुनःपुनरावर्त्तिते। "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणामिति" रघुः। २ "उभे अभ्यस्तम्" पा० उक्तयोः कृतद्वित्वयोरुभयोः धातुभागयोः। "नाभ्यस्ताच्छतुः" "अभ्यस्तस्य च" पा०।

**अभ्यस्य** अव्य० अभि+अस–ल्यप्। पुनःपुनरावर्त्त्येत्यर्थे।

**अभ्याकाङ्क्षित** न० अभि+आ+काङ्क्ष–भावे क्त। १मिथ्याभियोगे। (मिथ्यानालिश) कर्म्मणि क्त। २ईप्सिते त्रि०।

**अभ्याख्यान** न० अभि+आ+ख्या–ल्युट्। १ मिथ्याभियोगे, "शतं मे धारयसीत्यादि" मिथ्याभियोगे २ मिथ्योद्भावने च।

**अभ्यागत** पु० अभि+आ+गम+क्त। भिन्नग्रामीणे गृहं गतेऽतिथौ "सर्व्वत्राभ्यागतो गुरुः" पुरा०। २ सम्मुखागतमात्रे त्रि०। "अभ्यजातोऽभ्यागततूर्णतर्णकान्" माघः।

**अभ्यागम** आभिमुख्येनागम्यतेऽत्र अभि+आ+गम–अप्। १ युद्धे। कर्मणि अप्। २ अन्तिके। करणे अप्। ३ विरोधे। भावे अप्। ४ अभ्युत्थाने ५ अभिघाते ६ अभिमुखगमने "किं वा मदभ्यागमकारणं ते" रघुः।

**अभ्यागमन** न० अभि+आ–गम–ल्युट्। १ आभिमुख्येनोद्गमने २ अभ्युत्थाने च।

**अभ्यागारिक** पु० अभ्यगारे तद्गतकर्म्मणि व्याप्टतः ठन्।